श्रीमदेकदंतगजाननकभूषणराजविपक्षभर्त्रेनमः॥ॐ॥एकलोचनमेकार्द्धसार्द्धलो
१ चनमन्यतः॥लीलार्थंनीलकंठार्द्धं महः किमपिमन्महे॥१॥ ॥पितुरनंतरमुत्तरको
सलान्समधिगम्यसमाधिजितेंद्रियः॥दशरथः प्रशशासमहारथोयमवतामव
तांचधुरिस्थितः॥१॥पितुरिति॥समाधिना॥समाधिर्नियमेध्यानेसमरः॥संयमे
नजितेंद्रियः॥यमवतांसंयमिनांअवनीरक्षतांचधुर्यग्रेस्थितः महारथः॥एकोद
शसहस्रैश्चयोधयेद्यस्तु धन्विनां॥शस्त्रशास्त्रप्रवीणश्च समहारथउच्यते॥१॥आ
त्मानंसारथिंचाश्वान्रक्षन्युध्येतयोनरः॥एकोदशसहस्रेणसमहारथउच्यते॥२॥
दशरथः पितुरनंतरंउत्तरकोसलान्समधिगम्यप्राप्यप्रशशास॥अत्रमनुः॥क्षे रा
त्रियस्यपरोधर्मः प्रजानांपरिपालनमिति॥ऊनचिह्नंबिजमेनऊजं॥ नलक्षणंतु॥ १
२ चतुर्वेदस्यनत्वशः सर्वयोद्धगुणान्वितः॥सहस्रंयोधयत्येकः समहारथउच्यते॥३॥

पान्नांशो भार्धांविष्यभावात्॥ हेमप्ररूपस्तुश्नो भिकट्जिपादनः॥२०॥ अजिनदंडभ
नं कुशमेखलां यजनगिरं भगर्भंगपारिग्रहं॥ अधिवसंस्तनुमध्वरदीक्षितामस
मभासमभासपदीश्वरः॥२१॥ अजिनेति॥ ईश्वरः भगवान् ऋषभः निः॥ ऐश्वर्यस्य
समग्रस्य धर्मस्य यशसः श्रियः॥ वैराग्यस्याथ मोक्षस्य षण्णां भगमितिस्मृतः॥१॥
पृथिवीसलिलं तेजो वायुराकाशमेव च॥ सूर्यचंद्रमसौ सोमयाजि चेत्यष्टमूर्तयः॥२॥
अजिनं कृष्णा जिनं दंडं औदुंबरं च बिभ्रत् इति अजिनदंडभृतं कृष्णाजिनेदीक्षय न४
ति औदुंबरं दीक्षितदंडं यजमानाय प्रयच्छतीति वचनात्॥ अजिनं चर्मकृत्तिस्त्री
त्यमरः॥ कुशमयीमेखलाय स्याः तां कुशमेखलां॥ शरमयी मौंजी वा मेखला तया
यजमानं दीक्षयतीति विधानात्॥ प्रकृते कुशग्रहणं क्वचित्प्रतिनिधिदर्शनात् कृतं॥

यतगिरंवाचंयमं॥ वाचंयमस्तु नीतिश्रुतेः॥ मृगशृंगंपरिग्रहः कंडूयनसाधनं
यस्यास्तां॥ कृष्णविषाणया कंडूयतइतिश्रुतेः॥ अध्वरदीक्षितां संस्कारवि
शेषयुक्तां तनुं दशरथी मधिवसन्नधितिष्ठन् असमाः भासो यस्मिन्कर्मणि
यथातथा अभासयत् भासयतिस्म॥२१॥ अवभृथप्रयतो नियतेंद्रियः सुरस
माजसमाक्रमणोचितः॥ नमयतिस्मसकेवलमुन्नतं वनमुचे नमुचेररये शिरः॥२२॥
अवेति॥ अवभृथेन प्रयतो नियतेंद्रियः सुरसमाजसमाक्रमणोचितः॥ देवस
भाधिष्ठानार्हः सः दशरथः उन्नतं शिरः वनमुचे जलवर्षिणे॥ जलं नीरं वनं सलि राम
लमित्यमरः॥ नमुचेररये केवलमिंद्रायैव नमयतिस्म॥ न कस्मैचिदन्यस्मैमा
नुषाये सुर्थः॥२२॥ असकृदेकरथेन तरस्विना हरिहयाग्रसरेण धनुर्भृता॥ दिन

२ समपादपूर्णेभ्रूताधें इति विश्वः॥

२ हरिर्वा-ग्वबदारन्यानोहरिकपिलवर्णयोरितिविश्वः॥

कराभिमुखारणरेणवोरुरुधिरेरुधिरेणासुरद्विषां॥२३॥असरुदेति॥एकर
थेनाद्विजीयरथेननरस्विनावलवताहरिहयस्येंद्रस्याग्रसरेणधनुर्भृताअस
रुद्बहुशो॥दितकरस्याभिमुखाः आभिमुखोभिमाइत्यर्थः॥रणरेणवःसुरद्विषां
दैत्यानांरुधिरेणरुरुधिरे निवारिताः॥२३॥ अथसमावव्रजेकुसुमैनविरतामि
वसेवितुमेकनराधिपं॥यमकुबेरजलेश्वरवज्रिणांसमधुरंमधुरंचितविक्र
मं॥२४॥अथेति॥यमकुबेरजलेश्वरवज्रिणांधर्मराजधनदवरुणानांसमाद्ध
भरियस्याःसमधुरः॥साध्यस्यविनरणसंनियमनेभवंयैसुल्यमस्तरद्गसर्भः॥
तंसमधुरंआचितविक्रमंप्रजितपराक्रमंएकनराधिपंनद्रुशरथंसेवितुमिव
मधुःवसंतः॥अथपुष्परसेमधुर्दैत्येचैत्रेचमधुरितिविश्वः॥नवैःकुसुमैरुपलक्षितः

मधुर्वसंतेदैत्येचचैत्रेपुष्परसेपिचेतिविश्वः॥

१० सन्नृसमावधजेसमागतः॥ रिक्तहस्तेननोपेयाद्राजानंदेवतांगुरुमितिवचना
त्॥ पुष्पसमेतोराजानंसेवितुमागतइतिभावः॥२४॥ जिगमिषुर्धनदाध्युषि
तांदिशंरथयुजापरिवर्तितवाहनः॥ दिनमुखानिरविर्हिमनिग्रहैर्वि
मलयन्मलयंनगमत्यजत्॥२५॥ जिगमिषुरिति॥ धनदाध्युषितांकुबेरा
धिष्ठितांदिशंजिगीषुर्गंतुमिच्छुःरथयुजासारथिनाऽरुणेनपरिवर्तित
वाहनोनिवर्तिताश्वःरविःहिमनिग्रहैर्निराकरणैर्दिनमुखानिप्रभातानि
विमलयन्विशदयन्मलयंनगंमलयाचलंअत्यजत्॥ दक्षिणांदिशमत्या राम
क्षीदित्यर्थः॥२५॥ कुसुमजन्मततोनवपल्लवास्तदनुषट्पदकोकिलकू १०
जितं॥ इतियथाक्रममाविरभून्मधुर्द्रुमवतीमवतीर्यवनस्थलीं॥२६॥ कुसुमेति॥

आदौकुसुमजन्मततोनवपल्लवाःततस्तुषट्पदानांकोकिलानांचकूजितमित्ये
वंप्रकारेणयथाक्रमंक्रममनतिक्रम्यद्रुमवतींद्रुमभूयिष्ठांवनस्थलींअ
वतीर्यमिवपुर्वसंतःआविरभूत्॥ केषांचिद्द्रुमाणांपल्लवप्राथम्यात्केषांचि प३
त्कुसुमप्राथम्यान्नोक्तक्रमस्याविरोधः॥२६॥नयगुणोपचितामिवभूपतेः
सदुपकारफलांश्रियमर्थिनः॥अभिययुःसरसोमधुसंभृतांकमलिनीम
लिनीरपतत्रिणः॥२७॥नेति॥नयोनीतिरेवगुणःतेन॥अथवानयेनगुणैःशौ
र्यादिभिश्चोपचितांसतांसुपकारःफलंयस्यास्तांसदुपकारफलांभूपतेर्दश
रथस्यश्रियमर्थिनइवमधुनावसंतेनसंभृतांसम्यक्पुष्टांसरसःसंबंधिनीं
कमलिनींपद्मिनींअलिनीरपतत्रिणःअलयःभृंगाःनीरपतत्रिणःजलपत
त्रिणःहंसादयश्चाभिययुः॥२७॥कुसुममेवनकेवलमार्जवंनवमप्यशोकतरोः

स्मरदीपनं ॥ किसलयप्रसवोपि विलासिनां मदयिता दयिताश्रवणार्पितः ॥ २८ ॥ कु
सुममिति ॥ अरतोरस्य प्राप्तं आर्तवं नवं प्रसुगं अशोकेतरोः केवलं कुसुममेव स्म
रदीपनं उद्दीपनं नाभूत् किंतु विलासिनां मदयिता मादकः दयिताश्रवणार्पितः कि
सलयप्रसवोपि पल्लवसंजातोपि स्मरदीपनः अभूत् ॥ पादाहतः प्रमदया विकसत्यशु
शोकः शोकं जहाति बकुलो मुखवासीधुसिक्तः ॥ आलोकितः कुरवकः कुरुते विका
समालिंगितस्तिलक उत्कलिको विभाति ॥ १ ॥ ॥ २८ ॥ विरचिता मधुनोपवन
श्रियामभिनवा इव पत्रविशेषकाः ॥ मधुलिहां मधुदानविशारदाः कुरवका रव
कारणतां ययुः ॥ २९ ॥ विरचिता इति ॥ मधुना वसंतेन उपवनश्रिया विरचिता अ
भिनवाः पत्रविशेषकाः पत्ररचना इव स्थिताः मधूनां मकरंदानां दाने विशारदाः
चतुराः कुरवकाः तरवः मधुलिहां मधुपानां रवकारणतां ययुः ॥ भृंगाः कुरवकानां

मधुलिपी बाजगुरिसर्थः॥ दानशौंडान् अर्थिजनास्तुवंती तिभावः॥ २९॥ सुवदनाव
दनासवसंभृतस्तदनुवादिगुणः कुसुमोद्गमः॥ मधुकरैरकरोन्मधुलोलुपैर्बकुल
माकुलमायतपंक्तिभिः॥ ३०॥ सुवदनेति॥ सुवदनावदनासवेन कांतामुखमद्येन सं
भृतो जनितः॥ तत्तस्य दोहदमिति प्रसिद्धिः॥ तस्या सवस्यानुवादी सदृशो गुणो यस्य
तदनुवादिगुणः कुसुमोद्गमः कर्तृ मधुलोलुपैरायतपंक्तिभिः दीर्घपंक्तिभिः मधुकरैः
करणैः बकुलं बकुलवृक्षमाकुलमकरोत्॥ ३०॥ उपहितं शिशिरापगमश्रिया मु
कुलजालमशोभत किंशुके॥ प्रणयिनीव नखक्षतमंडनं प्रमदया मदयापितल
ज्जया॥ ३१॥ उपेति॥ शिशिरापगमश्रिया वसंतलक्ष्म्या किंशुके पलाशवृक्षे॥ पला
शः किंशुकः पर्णः इत्यमरः॥ उपहितं दत्तं मुकुलजालं कुड्मलसंहतिः मदेन यापित

लोलुभं लोलुपं लोलं लालसं लंपटं विदुः इति हलायुधः॥ ५

१२ लज्जया अपसारितत्र [illegible] मद्यपात्रए न्यि निपि पतनमेउ पाहितं न खध्वनमेव मंडनं तनेख
अशोभत ॥३१॥ व्रणगुरु [illegible] धरदुःसहं जघननिर्विषयीकृतमेखलं ॥ न खलु ताव
द्दोषमपोहितुं रविरलंचिरलंकृतवान्हिमं ॥३२॥ व्रणेति ॥ व्रणैर्दंतक्षतैर्गुरुभिः दुर्धरैः
प्रमदानामधरोष्ठैः दुःसहं हिमस्पर्शव्यथाकरत्वाद्सह्यं जघनेषु निर्विषयीकृता निर
वकाशीकृता मेखला येन तत्तथा रौ स्वात्स्वाजितमेखलमित्यर्थः ॥ एवंभूतं हिमं रविः
तावद्दावसंतावद्दोषं यथा तथा अपोहितुं निरसितुं नालं खलु न शक्नो हि किं तु चिर
लंकृतवान् तन्न चकार ॥३२॥ अभिनयान्परिचेतुमिवोद्यता मलयमारुतकंपितप रा
ल्लवा ॥ अमदयत्सहकारलता मनः सकलिकाकलिकामजितामपि ॥३३॥ अभिनयानिति ॥
अत्र च्यूतलतायानर्तकीसमाधिरभिधीयते ॥ अभिनयान् अर्थव्यंजकान् व्यापारान् ॥ १२

थंजकाभिनयोसमाविस्यमरः॥परिचेतुमभ्यसितुमुद्यमेवस्थि ताकिंतुमलयमा
रुतेनकंपितपल्लवा॥पल्लवशब्दे नहस्तोगम्यते॥सकलिकासकोरका॥कलि
काकोरकः पुमानित्यमरः॥सहकारलता॥कलिः कलहेद्धिषडध्यते॥क
लिःस्यात्कलहेशूरेकलिरंसयुगेषु॥धीतिकैरवः॥[illegible]श्च॥कामःरागश्च
नजितानामपि जितरागद्वेषाणामपीत्यर्थः॥मनः भ्रमदपात्॥३३॥प्रथमम्यभ म५
नाभिरुदीरिताःप्रविरलाइवमुग्धवधूकथाः॥सुरभिगंधिषुभृंगुविरेगि
रःकुसुमितासुमिता वनराजिषु॥३४॥प्रथममिति॥सुरभिगंधोयासां
तासुसुरभिगंधिषुकुसुमान्यासांसंजातानिकुसुमिताः वनराजिषुमि
नाश्रीमिता॥प्रथममभ्यसनाभिरुदीरिताः॥गिरःआलापाःप्रविरलाःमौग्ध्यात्

३२ स्तोकोऽन्त्यमुग्धवधूनां कथाः वाच इव बभुः विरेजुस्ताः ॥३४॥ श्रुतिसुख
भ्रमरस्वनगीतयः कुसुमकोमलदंतरुचो बभुः ॥ उपवनांतलताः पवनाहतैः
किसलयैः सलयैरिव पाणिभिः ॥३५॥ श्रुतिरिति ॥ श्रुतिसुखाः कर्णमधुराः
भ्रमरस्वना एव गीतयो यासां ताः कुसुमान्येव कोमला दंतरुचो दंतकांत
यो यासां ताः ॥ अनेन सस्मितत्वं विवक्षितं ॥ उपवनांतलताः पवनाहतैः किस
लयैः सलयैः साभिनयैः ॥ लयशब्देन लयानुगतोऽभिनयो लक्ष्यते ॥ उपव
नांते पवनाहतैरिति सन्निधियचाभिधानात्पाणिभिरिव बभुः ॥ अनेन ल राम
तानां नर्तकीसाम्यं गम्यते ॥३५॥ ललितविभ्रमबंधविचक्षणं सुरभिगंध
पराजितकेसरं । पतिषु निर्विविशुर्मधुमंगनाः स्मरसखं रससखंडनवर्जितं ॥३६॥ ३३

ललितमहति॥ अंगनाः ललितविभ्रमबंधविचक्षणं॥मधुरविलासघटनापटु
तरं॥सुरभिनाम नोहरेण गंधेन पराजितकेसरं नि।जितबकुलपुष्पं॥ अथ
केसरे बकुल इस भरः॥स्मरस्यसरवाहृति स्मरस्सरवंस्मरोद्दीपकमित्यर्थः॥म
धुं मद्यं॥ अर्द्धचोः पुंसि चेति पुल्लिंगता॥ ऽकंचे॥मकरंदस्य मद्यस्य माक्षिकस्य
पिवा चकः॥ अर्द्धचादिगणे पाठात्पुंनपुंसकयोर्मधुरिति॥१॥ पतिषु विषयेरस
खंड नवाजितं अनुरागभंगरहितं। यथा तथा बिविभ्रुः॥परस्परानुरागपूर्वकंप
तिभिः सह पपुरित्यर्थः॥ २॥ भ्रुमुभिरे स्मितचारुतराननाश्चि पद्मवश्लथ
सिंजितमेखलाः॥विकचतामरसा गृहदीर्घिकामदकलोदकलोलविहंगमाः ३॥
भ्रुमुभिरिति॥विकचतामरसाः विकशितकमलाः मदेन कलाः अव्यक्तमधुर

मदोत्कटेयमदकलः इसमरः॥१

सरोवापितुर्दीर्घिकारसमरः॥

१४ ध्वनंतउदकेषुलोलविहंगमाः जलप्रियपक्षिणोहंसादयोयासुताः॥ गृहेषु
दीर्घिकाः बाष्पैःस्मितेनचारूणिविलोचनानियासांताः श्लथाःसिंजिताः
मुखराःमेखलाःयासांताःस्त्रियइवबभुभ्रभिरे॥३७॥ उपययौतनुतांमधु
खंडिताहिमकरोदयपांडुमुखच्छविः॥ सदृशमिष्टसमागमनिर्वृतिंवनितया
नितयारजनीवधूः॥३८॥ उपययाविति॥ मधुनाममधुसमयेनखंडिताल्हा
संगमिता॥ क्षीयंतेस्वल्पतमरात्रयोरात्रयः॥ खंडिताख्यानायका ध्वन्यते॥
हिमकरोदयेनचंद्रोदयेनपांडुमुखस्यप्रदोषस्यवक्त्रस्यच्छविर्यस्याःसा राम
रजन्येववधूःइष्टसमागमनिर्वृतिंप्रियसंगसुखं॥ निर्वृतिःपरमंसु
खमित्यमरः॥ अनितयाअप्राप्तसमावनितयासदृशांतुल्यांतनुतांन्यूनत्व १४

१रम्भतामदनक्षतचेतसः ञियसखीलघुवागिवयोषितां॥ प्रियतमा
नकरोत्कुलहांतरे मृदुरवाहुरवापसमागमात्॥
तांकारयंचोपमयो॥३८॥ अपतुषारतया विशदप्रभैः सुरतरागपरिश्र
मनोदिभिः॥ कुसुमचापमतेजयदंशुभिर्हिमकरोमकरोर्जितकेतनं॥ ३९॥
अपेति॥ हिमकरः चंद्रः अपतुषारतया अपगतनीहारतया विशदप्रभैः
निर्मलकांतिभिः सुरतरागपरिश्रमनोदिभिः सुरतसंगरखेदहारिभिः अं
शुभिः मकरोजितकेतनं मकरेणऊर्जितं केतनं ध्वजोयस्यतं लब्धा
वकाशसाद्युच्छ्रितध्वजमित्यर्थः॥ कुसुमचापमतेजयत्॥ तेजोयुक्तं
चकार॥ सहकारिलाभात्कामोपितीक्ष्णोभूदित्यर्थः॥ ३९॥ हुतहुता
शनदीप्तिवनश्रियः प्रतिनिधिः कनकाभरणस्ययत्॥ युवतिभिः कुसु
मंदधुराहितं तदलं केद्रल केसरपेशलं॥४०॥ हुतइति॥ हुतहुताशनदीप्ति

दशाननच्छिकथा यव भासित रक्षितमा
सवर्णं पि मखोरिवा। चक्रकेलिपुष्पस्मेष्यु

आन्याद्दिप्रज्वलितानिप्रभं यत्कुसुमं कर्णिकारमित्यर्थः॥ वनश्रियः उपव
नलक्ष्म्याः कनकाभरणस्य प्रतिनिधिरभूदिति शेषः॥ दलेषु केसरेषु च पेश
लं सुकुमारपत्रं किंजल्कमित्यर्थः॥ आहितं प्रियैरिति शेषः॥ नव कुसुमं
अलकेषु कुंतलेषु युवतयः दधुः॥४०॥ अलिभिरंजनबिंदुमनोहरैः कुसुम
पंक्तिनिपातिभिरंकितः॥ नखलु शोभयति स्म वनस्थलीं न तिलकस्तिल
कः प्रमदामिव॥४१॥ अलिभिरिति॥ अंजनबिंदुमनोहरैः कज्जलकणसुं
दरैः कुसुमपंक्तिषु निपातनशीलैः अलिभिरंजनश्चिह्नितस्तिलकः श्रीमा
न्भ्रामकवृक्षः॥ तिलकः क्षुरकः श्रीमानित्यमरः॥ वनस्थलीं तिलको
विशेषकः॥ तमालपत्रतिलकः चित्रकाणि विशेषकं॥ द्वितीये चतुरीपंच

नस्त्रिया मिस्समरः ॥ प्रमदामिव नरोभयत्रिस्थोऽरिन आपितु रोभयादि सर्थः ॥४३॥
भ्रमदयन्मधुगंधसनाथया किसलया धरसंगतया मनः ॥ कुसुमसंभृतया
नवमल्लिकास्मितरुचा तरुचारुविलासिनी ॥४४॥ भ्रमदयन्निति ॥ तरुचारु
विलासिनी तरोः पुंसश्चारुविलासिनी नवमल्लिकासत्पस्वारूपालता ॥ लसला
नवमल्लिके सुमरः ॥ मधुनो मकरंदस्य मद्यस्य च गंधेन सनाथया गंधप्रधा
नयेस्पर्धः ॥ किसलय एवाधरस्तत्र संगतया प्रसूतरागयेस्पर्धः ॥ कुसु
मैः संभृतया संपादितया कुसुमरूपपेलपर्धः ॥ स्मितरुचा हास्यकांत्या मनः
पश्यता मितिरोषः ॥ भ्रमदयत ॥४४॥ अरुणरागनिषेधिभिरंशुकैः श्रवणए
लब्धपदैश्च यवांकुरैः ॥ परभृताविरुतैश्च विलासिनः स्मरबलैरबलैकर

१६ साःकृताः॥४३॥अरुणइति॥विलासिनः विलसनशीलाः पुरुषाः अरुणस्यानुरोः
रागमारुण्यं निषेधंति तिरस्कुर्वंती सरुणरागनिषेधिनस्तैः कुसुंभादिरंजना
सर्थः॥ मत्सरहरैरि अंशुकैरंबरैः अवणेषुलब्धपदैः निवेशितैरित्यर्थः॥ यवांकुरैः
परभृतविरुतैः कोकिलारूजितैश्चएभैः स्मरबलैः कामसैन्यैः अबलाया
मेवएकः रसोयेषांते अबलैकरसाः स्त्रीपरतंत्राः कृताः॥४४॥उपचितावय
वाशुचिभिःकणैरलिकदंबकयोगमुपेयुषी॥सदृशकांतिरलक्ष्यतमंजरी
तिलकजालकजालकमौक्तिकैः॥४५॥उपचितेति॥शुचिभिः शुभ्रैः क
णैः रजोभिः उपचितावयवापुष्टावयवा अलिकदंबकयोगउपेयुषीप्राप्ता॥ राम
तिलकजातिलकवृक्षोत्थामंजरी अलकेषुयज्जालं मौक्तिकसंबंधि १६
१क भा शै१

मौक्तिकैः सदृशाकां निरलक्ष्यत ॥ भृंगसंगिनी भुभ्रातिलकमंजरीनी लोलकास
क्तमुक्ताजालमिवालक्ष्यतेति वाक्यार्थः ॥४४॥ ध्वजपटं मदनस्य धनुर्भृतश्छ
विकरं मुखचूर्णमृतुश्रियः ॥ कुसुमकेसररेणुमलिव्रजाः सपवनोपवनोत्थित
मन्वभुः ॥४५॥ ध्वजपटमिति ॥ अलिव्रजाः मदनस्य कामस्य धनुर्भृतो धानुष्क
स्य ध्वजपटं पताकामृतुश्रियः वसंतलक्ष्म्याः छविकरं शोभाकरं मुख
चूर्णं मुखालंकारचूर्णमृतं सपवनं पदुपवनं तस्मिन्नुत्थितं कुसुमानां केसरे च
षु किंजल्केषु ये रेणवस्तमन्वभुरन्वगच्छन् ॥४५॥ अनुभवन्नवदोलमृतूत्सवं
पटुरपि प्रियकंठजिघृक्षया ॥ अनयदासनरज्जुपरिग्रहे भुजलतां जलतामब ह२
लाजनः ॥४६॥ अनितीति ॥ नवा दोला प्रेंखा यस्मिन्नृतं नवदोलं ऋतूत्सवं वसंतो

१७ सवमनुभवन् अबलाजनः पटुरपि निपुणोपि प्रियकंठस्पृजिघृक्षया गृहीतुमा
लिंगितुमिच्छया आसनरज्जुपरिग्रहे भुजलतां बाहुलतां शैथिल्यं। उत्लचोरभे जइतोर
दः॥ शिथिलतामनयत्॥ दोलाक्रीडासु पतनभयव्याजेन प्रियकंठमाश्लिष्यं(
न्निसर्थः॥ ४६॥ सजनमानमलं बत विग्रहैर्न पुनरेति गतं चतुरं वयः॥ पर
भृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः॥ ४७॥ सुजेति॥ बतेसा
मंत्रणे॥ विस्मयामंत्रणे बते त्यमरः॥ बत अंगनाः मानकोपं त्यजत॥ स्त्रीणामी
र्ष्याकृतः कोपो मानोन्यासंगिनि प्रिय इत्यमरः॥ विग्रहैर्विरोधैः अलं॥ विरोधोनका राम
र्य इत्यर्थः॥ गतमतीतं चतुरमुपभोगक्षमं वयो यौवनं पुनर्नैति॥ नागच्छतीत्ये १७
वंरूपे॥ स्मरमते स्मराभिप्राये परभृताभिः कोकिलाभिर्निवेदिते सति वधूजनो र

मतेस्म॥ कोकिलाकूजितोद्दीपितस्मरः स्त्रीजनः कामशास्त्रभयादिबोधं
खलेः स्मरखेलेदित्यर्थः॥४७॥ अथ यथासुखमार्तवमुत्सवं समनुभूय विला
सवतीसखः॥ नरपतिश्चकमे मृगयारतिं समधुमन्मधुमन्मथसंनिभः॥४८॥ अथ
अथानंतरं मधुं मथ्नातीति मधुमत् विष्णुः मधुः वसंतः मथ्नातीति मथः॥ मनः
शास्त्राभ्यासजन्यज्ञानं तस्य मथः मन्मथः॥ तेषां संनिभः सदृशः मधुम
मधुमन्मथसंनिभः॥ नरपतिः सः दशरथः विलासवतीनां सखा इति विग्रहः॥
स्त्रीसहचरः सन् ऋतुः प्राप्तोऽस्येति आर्तवस्तं उत्सवं वसंतोत्सवं यथासुखं
समनुभूय मृगयारतिं मृगयाविहारं चकमे आचकांक्ष॥४८॥ परिचयं चलल
ष्यनिपातने भयरुषोश्च तदिंगितबोधनं श्रमजयात्प्रगुणां च करोत्यसौ तन

१८ नुमतोऽनुमतः सचिवैर्ययौ ॥४९॥ व्यसनासंगदोषंपरिहरन्नाह ॥ परीति ॥ असौ
मृगयाचललक्ष्याणिमृगगवयादीनितेषांनिपातनेपरिचयमभ्यासंकरोतिभ
यरुषोर्भयक्रोधयोस्तदिंगितबोधनंयेषांतेषांचललक्ष्याणामिंगितस्यचेष्टि
तस्यभयादिलिंगभूतस्यबोधनंज्ञानंकरोति ॥ तनुंशरीरंश्रमस्यजयात्निरा
सात्प्रगुणांप्रकृष्टलाघवादिगुणवतीचकरोति ॥ अतःहेतोःसचिवैरनुमतः
ययौ ॥ सर्वंचैतद्युद्धोपयोगीत्यतस्तदपेक्षयामृगयायांप्रवृत्तिर्नतुव्यसनितयेति प्र४
भावः ॥४९॥ मृगवनोपगमक्षमवेषभृद्विपुलकंठनिषक्तशरासनः ॥ गगन राम
मश्वखुरोद्धतरेणुभिर्नृसवितासवितानमिवाकरोत् ॥५०॥ मृगेति ॥ मृगा
णांवनंतस्योपगमःप्राप्तिस्तस्यक्षमम्अर्हंवेषंबिभर्तीतिसःतथोक्तः ॥४ १८

मृगयाविहारानुगुणवेषधारीत्यर्थः॥ विपुलं कंठे निषक्तशरासनो ऽग्रधन्वा ना
सविताइवैतिन्यसविताउपश्लेषः॥ उपमितसमासः॥ सः राजा अश्वखुरोद्धत
रेणुभिर्गगनं वितानं तुच्छं असदिवाकरोत्॥ गगनं नालक्ष्यत इत्यर्थः॥ नभोंतरि
क्षं गगनमित्यमरः॥ वितानं तुच्छमंदयोरिति विश्वः॥ अथवा सवितानमि
त्येकं पदं॥ सवितानमुल्लोचः सहितमिवाकरोत्॥ अस्त्री वितानमुल्लोचः दूष्या
द्यं वस्त्रवेश्मनीत्यमरः॥५०॥ ग्रथितमौलिरसौ वनमालया तरुपलाशस
वर्णतनुच्छदः॥ तुरगवल्गनचंचलकुंडलो विरुरुचे रुरुचेष्टितभूमिषु॥५१॥ ग्रथितेति
वनमालया वनपुष्पस्रजा ग्रथितमौलिः बद्धधम्मिल्लः॥ तरूणां पलाशैः प
त्रैः सवर्णः समानः तनुच्छदो वर्म यस्य सः तथोक्तः॥ इदं च वर्मणः पलाशसावर्ण्यं

३४ भिधानं मृगादीनां विश्वासार्थं ॥ तुरगस्य वल्गनेन गतिविशेषेण चंचलकुंड
लः असौ दशरथः रुरुभिः मृगविशेषैः चेष्टितायाश्चरितायां भ्रमपत्रासु
विरुरुचे विदिद्युते ॥५१॥ ननु लतावितानिवेशितविग्रहाभ्रमरसंक्रमिते
क्षणवृत्तयः ॥ ददृशुरध्वनि तं वनदेवताः सुनयनं नयनंदितकोशलं ॥५२॥ तानि
ननु स्फुरल्लतासु विनिवेशितविग्रहाः संक्रमिताः लीनाः भ्रमरेषु संक्रमिताः
ईक्षणवृत्तयो दृग्व्यापारा याभिस्ताः वनदेवताः सुनयनं सुलोचनं नयनेन
नीसानंदिताः कोशलाः येन तं दशरथं अध्वनि ददृशुः ॥ प्रसन्नपावनत राम
यातं देवताश्चापि गूढवृत्त्या ददृशुरित्यर्थः ॥५२॥ श्वगणिवागुरिकैः प्रथमास्थि ३४
तं व्यपगतानलदस्युविवेशसः ॥ स्थिरतुरंगमभूमिनिपानवन्मृगवयोगवयोपचितं वनं ५३ ॥

स्कंदशारथ्यैः श्वनांगणाः श्वगणाः सरघामस्तीति श्वगणिनः श्वग्राहि मतैवागुरामृग
बंधनरज्जवः॥वागुरामृगबंधनमित्यमरः॥तया चरंतीति वागुरिकाः जालि
काः॥द्वौवागुरिकजालिकावित्यमरः॥नैश्वप्रथममास्थितमधिष्ठितं व्यपग
ताः श्वनलाः दावाग्नयोदस्यवः तस्कराः श्वयस्मात्तनथो क्तं॥दस्युतस्कर
मोषकाइत्यमरः॥कारयेद्द नविशोधनमादौमातुरं जिकमपिप्रविविक्तः॥श्व
भ्रस्थनुगामः प्रविरोधसंकटे चगहने न च तिष्ठेदिति कामंदकः॥स्थिरा
द्दछापंकादिरहितानुरंगमयोग्याभूमिर्यस्यतत्तुनिपानवत् श्वाहावपुक्तं॥श्वा
हावस्तुनिपानंस्यादुपकूपजलाशयइत्यमरः॥मृगैः हरिणादिभिः वयोभिः पक्षि
भिः गवयैः गोसदृशैः श्वारण्यपशुविशेषैश्चोपचितं समृद्धं वनं विवेश॥५३॥६२॥

अथ नभस्य इव त्रिदशायुधं कनकपिंगतडिद्गुणसंयुतं ॥ धनुरधिज्यमनाधिरुपा
२० ददे नरवरो रवरोषितकेसरी ॥५४॥ अथेति ॥ अथ अनाधिर्मनोव्यथारहितः नरे
३ णत्का षु वरः श्रेष्ठः रवेण धनुर्ष्टरेण रोषिताः केसरिणः सिंहाः येन सः राजा कनकपि
४ ग पिंगः पिशंगः पिंगतडिदेव गुणो मौर्वी तेन संयुतं संयुक्तं त्रिदशायुधं इंद्रचापं न
भस्यो भाद्रपदमास इव ॥ स्युर्नभस्यप्रौष्ठपदभाद्रभाद्रपदाः समा इत्यमरः ॥
५ उ अधिज्यमधिरूढमौर्वीकं धनुरादादे जग्राह ॥५४॥ तस्य स्तनप्रणयिभिर्मु
हुरेणशावैर्व्याहन्यमानहरिणीगमनं पुरस्तात् ॥ आविर्बभूव कुशगर्भमु सम
खं मृगाणां यूथं तदग्रसरगर्वितकृष्णसारं ॥५५॥ तस्येति ॥ स्तनप्रणयिभिः
स्तनपायिभिः एणशावैर्हरिणार्भकैः ॥ पृथुकः शावकः शिशुरित्यमरः ॥ २०

तद्धसत्त्वतयातद्गमनानुसारेण मुहुर्मुहुः प्रतिषिध्यमाने ॥ १

उहुः व्याहृत्यसमा तैर्हरिणी नां गमनं गानि यस्य तत्र कुशाग्रगर्भे येषां तानि मुखानि यस्य
तत्कुशाग्रगर्भमुखं ॥ तस्य पृथस्याग्रे सरः पुरःसरो गर्वितः दृप्तश्च कृष्णसारो यस्य
तद्मृगाणां यूथं कुलं ॥ सजातीयैः कुलं यूथं तिरश्चां पुंनपुंसकमित्यमरः ॥ त
स्य द्वारथस्य पुरस्तादग्रे आविर्भूयमाने ५५ ॥ तस्य प्रार्थितं जवनवाजिगमनेनरा
ज्ञा तूणीमुखोद्धृतशरेण विशीर्णपंक्ति ॥ श्यामीचकार वनमाकुलदृष्टिपातै
र्वाते रितोत्पलदलप्रकरैरिवाभः ॥ ५६ ॥ तदिति ॥ जवनः जवशीलः तरस्वी त्वरि न ०
तो वेगी प्रजवी जवनो जवी इत्यमरः ॥ तेन वाजिना गमनं तेनारूढेन तूणी इषुधिः
तस्याः मुखाद्विवरादुद्धृतः शरो येन राज्ञा प्रार्थितमभियातं ॥ याच्यायामभियाने
च प्रार्थना कथ्यते बुधैरिति केशवः ॥ अतएव विशीर्णपंक्तिः संघीभावो यस्य तत्

अं चः २

२९ मगाय थंकर्तुं आर्द्रैर्भयादश्रुसिक्तैः॥आकुलाभयचकितनायैर्दृष्टिपातैः तैः वा
तेरितैः प्रवनप्रेरितैः उत्पलदलप्रकरैरिंदीवरपत्रवृंदैरिव वनं श्यामीचकार ५६॥
लक्ष्मीकृतस्य हरिणस्य हरिप्रभावः प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहं॥ आक
र्णकृष्टमपि कामितया स धन्वी बाणं कृपामृदुमनाः प्रतिसंजहार॥५ [illegible]लक्ष्मीति॥
हरिः इंद्रः विष्णुर्वा तस्येव प्रभावो यस्य सः धन्वी धनुष्मान् सः नृपो लक्ष्मीकृतस्य वे
द्धुमिष्टस्य हरिणस्य स्वप्रेयसो देहं व्यवधाय अनुरागात् तद्रूपि स्थितां चरतीति
चरतां सहभूतां चरीं हरिणीं प्रेक्ष्य कामितया स्वयं कामुकत्वात् कृपामृदुमनाः करु राम
णार्द्रचित्तः सन् आकर्णकृष्टमपि दुःप्रतिसंहरमपि स्वमर्मः॥ बाणं प्रतिसंजहार॥ २९
निपुणा लादित्यर्थः॥ तैः पुण्यं धन्वीत्यनेन गम्यते॥५७॥ तस्या परेष्वपि मृगे

पुशरान्मुमुक्षोः कर्णांतमेत्यबिभिदे निबिडोपिमुष्टिः॥ त्रासातिमात्रचटुलैः
२ ने स्मरयत्सुनेत्रैः प्रौढप्रियानयनविभ्रमचेष्टितानि॥ पु टा नस्येति। त्रासादतिभया
त्र२ दतिमात्रचटुलैरत्यंतं चंचलैः नेत्रैः प्रौढप्रियानयनविभ्रमचेष्टितानि॥ चतु
रकांताविलोचनविलासव्यापारान् स्मरयत्सु साधुत्पात्स्मरयत्सु अपरेष्वपि
मृगेषु शरान्मुमुक्षोः तस्य नृपस्य निबिडो दृढोपिमुष्टिः कर्णांतमेत्य बिभिदे स्व
यमेवाभिद्यतेस्म॥ कामिनस्तस्य प्रियाविभ्रमस्मरणात् निजानितकृपाजनिरेकाम्मु
ष्टिभेदोनत्वन्नेपुण्यादितितात्पर्यं॥ पु टा॥ उत्तस्थुषः शिशिरपल्वलपंकमध्यान्
२ स्ता मुस्ताप्ररोहकवलावयवानुकीर्णं॥ जग्राह सद्रुतवराहकुलस्य मार्गं सुव्य
क्तमार्द्रपदपंक्तिभिरायताभिः॥ पुष्पि॥ उदितिः सः नृपः मुस्ताप्ररोहाणांमुस्ता

स्थूलाक्षर | सर्गे १२

कुराणां कवलाः ग्रासास्तेषामवप्लवैः भ्रमदिवन्नामुखभ्रांशिभिः शाकलैः अ
२२ ता२ नुकीर्णं व्याप्तं आर्द्रैभिः दीर्घैभिः आर्द्रपदपंक्तिभिः स्तुवन्कैः शिशिरपल्व
ल पंकमध्यात् उत्तस्थुषः उत्थितस्य द्रुतं वराहकुलस्य पलायितवराहस्य
स्य मार्गं जगाहे अनुससार ॥५१॥ तं वाहनादवनतोत्तरकायमीषद्विध्यं
तमुद्धृतसटाः प्रतिहंतुमीषुः ॥ नात्मानमस्य विविदुः सहसा वराहा वृक्षेषु
बद्धभिषुभिर्जघनाभोगेषु ॥५२॥ तमिति ॥ वराहाः वाहनादश्वादीषदवन
तोत्तरकायं किंचिदानतपूर्वकायं विध्यंतं प्रहरंतं तं तमुद्धृतसटाः ऊर्ध्व राम
केसराः ॥ सटा जटा केसरयोरिति विश्वः ॥ प्रतिहंतुमीषुः प्रतिहंतुमैच्छन् ॥
अस्य तपस्येषुभिः सहसा जघनाभोगेषु वृक्षेषु बद्धेषु नात्मानं २२

नविविदुः ॥ एनेन वराहाणां मनस्वित्वं नयस्य हस्तलाघवं चोक्तं ॥ ७ ॥ तेना
भिधानुरभसस्य विकृष्य पत्री वन्यस्य नेत्रविवरे महिषस्य मुक्तः ॥ निर्भिद्य वि
ग्रहमशोणितलिप्तपुंखस्तं पातयां प्रथममास पपात पश्चात् ॥ ८ ॥ तेनेति ।
अभिधानेन रभसः श्रोतुः कर्णपस्य तस्याभिहंतुमुद्यतस्य सर्वथं ॥ वन्यस्य वनभ
वस्य महिषस्य नेत्रविवरे नेत्रमध्ये तेन नृपेण विकृष्याकृष्य मुक्तः पत्री शरः वि
ग्रहं महिषदेहं निर्भिद्य विदार्य शोणितलिप्तो नभवत् अशोणितलिप्तः पुंखो य
स्य स तथोक्तः स नृ तं महिषं प्रथमं पातयामास स्वयं पश्चात्सपात ॥ कृञ्चानु
प्रयुज्यते लिटीत्यत्रानुशब्दस्य व्यवहितविपर्यासप्रयोगनिवृत्त्यर्थत्वात्ता
तंपां प्रथममास सपप्रयोग इति पाणिनीयाः ॥ यथाह वार्त्तिककारः ॥ विपर्या

सतिचस्त्स्वर्थंवाक्यव्यवहितंनिवसार्थंचेति॥६३॥प्रायोविषाणपरिमोक्षलघू
त्तमांगान्खड्गांश्चकारनृपतिर्निशितैःक्षुरप्रैः॥भृंगंसदृप्तविनयाधिकृतःप
रेषामत्युच्छ्रितंनममृषेनतुदीर्घमायुः॥६४॥प्रायइति॥नृपतिःनिशितैःक्षुर
प्रैःशरविशेषैःखड्गान्मृगान्॥गंडकेखड्गखड्गिनावितिसमरः॥प्रायःबाहु
ल्येनविषाणपरिमोक्षेणभृंगभंगेनलघूनि आगुरूणिउत्तमांगानिशिरांसि
येषांतान्चकार॥नत्ववधीदित्यर्थः॥कुतःदृप्तःविनयाधिकृतःदुष्टनिग्रहनि
युक्तःसःराजापरेषांप्रतिकूलानांअत्युच्छ्रितंमुन्नतंभृंगंविषाणंप्राधान्यं र
वा॥भृंगंप्राधान्यसान्वोश्चेतिसमरः॥नममृषेनसेहे॥दीर्घंआयुःजीवितका र:
लंनेत्यर्थः॥नममृषेकिंतुममृषेत्यर्थः॥६५॥व्याघ्रानभीरभिमुखोत्पतितान्

गुहाभ्यः फुल्लासनाग्रविटपानिव वायुरुग्णान् ॥ शिक्षाविशेषलघुहस्ततया निमे
षात्तूणीचकार शरपूरितवक्त्ररंध्रान् ॥ ६२ ॥ व्याघ्रेति ॥ अभीर्निर्भीकः सः गु
हाभ्योभिमुखं सन्मुखं मुत्पतितान् आगतान् वायुना रुग्णान् भग्नान् फुल्लाः वि
कसिताः ये असनस्य सर्जवृक्षस्य अग्रविटपास्तानिव स्थितान् इषुधिभ्यस्ता
निस्तूणीः ॥ व्याघ्राणां चित्ररूपत्वादुपमानं ॥ फुल्लविशेषणं ॥ सर्जकासनबंधू
कपुष्पप्रियकजीवकाद्यः इत्यमरः ॥ शरैः पूरितानि वक्त्ररंध्राणि येषां तान्
व्याघ्रान् शिक्षाविशेषेणाभ्यासातिशयेन लघुहस्ततया निमेषात् तूणीच
कार ॥ तूणीपूरपूरितवानित्यर्थः ॥ ६३ ॥ निर्घातोग्रैः कुंजलीनान् जिघांसु
र्ज्यानिर्घोषैः क्षोभयामास सिंहान् ॥ नूनं तेषामभ्यसूयापरोभूद्वीर्योदग्रे

राजशब्देमृगेषु॥६४॥निर्घातमग्रैरिति॥कुंजेषु लीनान्॥निकुंज कुंजौ वा क्लीबे लता
२४ दिपिहितोदर इत्यमरः॥सिंहान् अभिघांसुः हंतुमिच्छुः निर्घातः व्योमोत्थित श्रो
तानिकः शब्दविशेषः॥तद्वदुग्रैः ज्यानिर्घोषैः रौद्रैः मौर्वीशब्दैः क्षोभयामास॥
अत्रोत्प्रेक्षते॥तेषां सिंहानां संबंधिनि वीर्येणारूढे तन्मृगेषु विषये यो रा
जशब्दस्तस्मिन् अभ्यसूयापरः असहमानं॥अन्यथा कुमेतानन्विष्यहन्यादि
त्यर्थः॥मृगाणामिति पाठे समासे गुणभूतत्वाद्राजशब्देन संबंधो दुर्घटः॥
शालिनीवृत्तमेतत्॥६४॥तान्हत्वा गजकुलबद्धतीव्रवैरान् काकुत्स्थः
कुटिलनखाग्रलग्नमुक्तान्॥आनंरणकृतकर्मणां गजानामानृण्यं गतमि राम
वमार्गणैरमंस्त॥६५॥तानिति॥काकुत्स्थः दशरथः गजकुलेषु बद्धं तीव्रं वैरं ये २४

श्रीपुरंदरसिकं
...तर ५

पांतान्कुटिलेषुनखाग्रेषुलग्नामुक्तागजकुंभमौक्तिकानियेषांतान्नृसिंहा
न्हत्वाआत्मानंरणेकृतकर्मणांकृतोपकाराणांगजानांआनृण्यंअनृणत्वं
मार्गणैःशरैः॥मार्गणोयाचकेशरइतिविश्वः॥गतप्राप्तवंतमिवामंस्तमेने॥६५॥
चमरान्परितोविवर्तिताश्वःक्वचिदाकर्णविकृष्टभल्लवर्षी॥नृपतीनिवतान्वि
धोज्यसद्यःसितवालव्यजनैर्जगामशांतिं॥६६॥चमरानिति॥क्वचित्च
मरान्परितःअभितःपरितइत्यादिनाद्वितीया॥प्रवर्तिताश्वःप्रधाविताश्वः
आकर्णविकृष्टान्भल्लानिषुविशेषान्वर्षतीतितथोक्तः॥सःनृपःनृपती
निवतान्चमरान्सितवालव्यजनैःशुभ्रचामरैःविधोज्यविरहय्यसद्यःशां
तिंजगाम॥शूराणांपरकीयमैश्वर्यमिवासह्यंनतुजीवितमितिभावः॥६६॥

अपि तुरं(ग)समीपादुत्पतंतं मयूरं न स रुचिरकलापं बाणलक्ष्यीचकार ॥ सपदिगतमन
स्कश्चित्रमाल्यानुकीर्णे रतिविगलितबंधे केशपाशे प्रियायाः ॥ ६७ ॥ अपीति ॥
सः नृपः तुरगसमीपादुत्पतंतमपि सुप्रहारमपीत्यर्थः ॥ रुचिरकलापं भासुरब
र्हं ॥ कलापो भूषणे बर्हे इत्यमरः ॥ मयूरं ॥ अनिरूगेन रोमीनि मयूरः बर्हैः चित्रेण
माल्येन अनुकीर्णे रत्यां विगलितबंधे प्रियायाः केशपाशे सपदिगतमनस्
कः प्रवृत्तचित्तः ॥ न बाणलक्ष्यीचकार न प्रजहारेत्यर्थः ॥ ६७ ॥ तस्य कर्कशवि
हारसंभवं स्वेदमाननविलग्नजालकं ॥ आचचाम सतुषारशीकरो भिन्नपल्ल
वपुटो वनानिलः ॥ ६८ ॥ तस्येति ॥ कर्कशविहारादतिव्यायामात्संभवो यस्य
तं आनने विलग्नजालकं बद्धकदंबकं तस्य नृपस्य स्वेदं सतुषारशीकरः शी

वीक्ष्यसकुंभंमुनिपुत्रंतापादंतःशल्यइवासीक्षितिपोपि॥७५॥हेतात्मै॥तातोज
नकः॥हाविषादगतेषु॥तातस्तुजनकःपितेत्यमरः॥हातातेतिक्रंदितंक्रोश
नमाकर्ण्यविषण्णःभग्नोत्साहःसन्तस्यक्रंदितस्यपयोवेतसगृहछन्नःप्रभव
स्यसमादिप्रभवःकारणंतमन्विष्यन्नुत्सारेणप्रीतिस्पूतं॥शल्यंशंकौशरेवंशरु
तिविश्वः॥सकुंभंमुनिपुत्रंप्रेक्ष्यसःक्षितिपोपितापापाद्दुःखादंतःशल्यंयस्यसः
अंतःशल्यइवासीत॥मत्तमयूरवृत्तमेतत्॥७५॥तेनावतीर्यतुरगात्प्रथि
तान्वयेनपृष्टान्वयःसजलकुंभनिषण्णदेहः॥तस्मैद्विजेतरतपस्विसुतःस्खल
द्भिरात्मानमक्षरपदैःकथयांबभूव॥७६॥तेनेति॥प्रथितान्वयेनप्रख्यात
वंशेन॥पापभीरुत्वंस्वचित्तं॥तेननरातातुरगादवतीर्यपृष्टान्वयोब्रह्महत्या

२८ शंकपायपृथक्कुलो जलकुंभे निषण्णदेहः स मुनिपुत्रः तस्मै राज्ञे स्खलद्भिरक्ष
रप्रायैः पदैः अक्षरपदैः अस्पष्टाक्षिवरणदृष्टोच्चारितैरित्यर्थः॥ आत्मानं द्विजेत
रश्चासौ तपस्विसुतश्च द्विजेतरतपस्विसुतः कथयांबभूव॥ न तावत्त्रैवणि
क एवाहमस्मि किं तु करणः॥ वैश्यात्तु करणः शूद्रायामिति याज्ञवल्क्यः॥ कुतो
ब्रह्महत्येत्यर्थः॥ तथा च रामायणे॥ ब्रह्महत्याकृतं पापं हृदयादपनीयतां॥ न द्वि
जातिरहं राजन्मा भूत्ते मनसो व्यथा॥ ६ शूद्रायामस्मि वैश्येन जातो जननप
दाधिप इति॥ ७६॥ तच्चोदितश्च तमनुद्धृतशल्यमेव पित्रोः सकाशमवसन्न
दृष्ट्योर्निनाय॥ ताभ्यां तथागतमुपेत्य तमेकपुत्रमज्ञानतः स्वचरितं नृप राम
तिः शशंस॥ ७७॥ तदिति॥ तच्चोदितस्तेन पुत्रेण चोदितः पित्रोः समीपं प्राप्य २८

शिरांबुकणसहितः।भिन्नाः निर्दलिताः पल्लवानां पुटाः कोशाः येन सः वनानिलः आ
चचाम जहार स्वेदं॥ रथोद्धतावृत्तमेतत्॥ ६८॥ इति विस्मृतान्यकरणीयमात्मनः
सचिवावलंबितधुरं नराधिपं॥ परिवृद्धरागमनुबंधसेवया मृगया जहार चतुरेव का
मिनी॥ ६९॥ द्रुतीतिता॥ इति आत्मनो विस्मृतं अन्यत्करणीयं कार्यं येन तं विस्मृता
न्यकार्यं नराधिपं स्वर्थः॥ सचिवैरवलंबिताधृताधूर्यस्य तं अनुबंधसेवया सं
ततसेवया परिवृद्धो रागो यस्य तं नराधिपं मृग्यंते यस्यां मृगया इति मृगया तु चतुर
विदग्धा कामिनीव जहार आचकर्ष॥ न जातु कामः कामानामुपभोगेन शाम्य
तीति भावः॥ सुमंगली वृत्तमेतत्॥ ७०॥ सललितकुसुमप्रवालशय्यां ज्वलि
तमहौषधिदीपिकासनाथां॥ नरपतिरतिवाहयांबभूव क्वचिदसमेतपरिच्छदस्त्रि

२६ यामं॥ ७०॥ सेति॥ सः नरपतिः ललितानि कुसुमानि प्रवालानि पल्लवानि शय्या यस्या
स्तां ज्वलिताभिर्महौषधिभिरेव दीपिकाभिः सनाथां त्रप्रदीपामित्यर्थः॥ त्रियामां रात्रिं
कंचिद्दृसमेन परिच्छदः परिहृत परिजनः सन्नित्यर्थः॥ अतिवाहयांबभूव गमया
मास॥ पुष्पिताग्रावृत्तमेतत्॥ ७०॥ उषसि स गजयूथकर्णतालैः पटुपटहध्वनि
भिर्विभूतनिद्रः॥ अरमत मधुरस्वराणि शृण्वन्विहंगविकूजितबंदिमंगलानि॥ ७१॥
उषसि प्रातःकाले पटूनां पटहानामिव ध्वनिर्येषां तैः॥ आनकः पटहो ढक्का भेर्यामा
नकदुंदुभिः॥ भेरिः स्त्री दुंदुभिः पुमानित्यमरः॥ गजयूथानां कर्णतालैः वितालैर्वा
द्यभेदैर्विनीतनिद्रः विगतनिद्रः स नृपः तत्र वने मधुरस्वराणि विहंगानां राम
कूजितान्येव बंदीनां मंगलानि मंगलगीतानि शृण्वन्नरमत॥ ७१॥ अनंत॥ २६

अथ जातु रुरोर्गृहीतवर्त्मा विपिने पार्श्वचरैरलक्ष्यमाणः॥ श्रमफेनमुचा तपस्विगा
ढां तमसां प्राप नदीं तुरंगमेण॥ ७२॥ अथ जातु कदाचित् रुरोः मृगस्य गृहीतव
र्त्मा स्वीकृतरुरुमार्गः विपिने वने पार्श्वचरैः अलक्ष्यमाणः तुरगवेगादिति भावः॥
श्रमेण फेनमुचा सफेनं स्रवता इति भावः॥ तुरंगमेण तपस्विभिर्गाढां व्याप्तां अवगा
ढां सेवितां तमसां नाम नदीं सरितं प्राप॥ ७२॥ कुंभपूरणभवः पटुरुच्चैरुच्च
चार निनदोंभसि तस्याः॥ तत्र स द्विरदबृंहितशंकी शब्दपातिनमिषुं विस
सर्ज॥ ७३॥ कुंभेति॥ तस्याः तमसायाः अंभसि कुंभपूरणेन भवः उत्पन्नः
पटुः मधुरः उच्चैर्गंभीरः निनदो ध्वनिः उच्चचार उदियाय॥ तत्र निनदे सः नृपः
द्विरदबृंहितं शंकत इति द्विरदबृंहितशंकी सन् शब्देन शब्दानुसारेण पतती

२७॥

निशाद्यपातिजं इषुं विससर्ज॥ स्वागतावृत्तमेतत्॥७३॥ नृपतेः प्रतिषिद्धमेव
तत्कृतवान् पंक्तिरथो विलंघ्य यत्॥ अपथे पदमर्पयंति हि श्रुतवंतोपि रजो
निमीलिताः॥७४॥ नृपतेरिति॥ तत्कर्म नृपतेः क्षत्रियस्य प्रतिषिद्धमेव यदेन
कर्म गजवधरूपं पंक्तिरथो दशरथो विलंघ्य लक्ष्मीकामो युद्धादन्यत्र क
रिवधं न कुर्यादिति शास्त्रमुल्लंघ्य कृतवान्॥ ननु विदुषस्तस्य कथमीदृग्विचे
ष्टितमित्याशंक्याह॥ अपथेति॥ श्रुतवंतोपि विद्वांसोपि रजोनिमीलिताः रजो
गुणावृत्ताः संतः न पंथा इत्यपथं॥ अपंथास्त्वपथं तुल्ये इत्यमरः॥ तस्मिन्नत्र राम
पथे अमार्गे पदमर्पयंति निक्षिपंति हि॥ अर्थांतरन्यासः॥ वैतालीयं वृत्तं॥७४॥
हा तातेति क्रंदनमाकर्ण्य विषण्णस्तस्यान्वेष्यन्वेतसगूढप्रभवं स॥ शल्यप्रोतं २७

येस्तु नः सः नृपतिः अनुद्धृतशल्यमेव अनुत्पादितशरमेव तं मुनिपुत्रं अव
सन्नदृशोर्नष्टचक्षुषोरंधयोरित्यर्थः॥ पित्रोर्मातापित्रोः॥ पिता मात्रेत्येकशेषः॥
सकाशं समीपं निनाय॥ इदं च रामायणविरुद्धं॥ अथाहमेकं संदेशं नीत्वा जनोऽभ्य
र्द्दुःखितौ॥ अस्यानाय महं पुत्रं तं मुनिं सह भार्ययेति॥ तत्र नदीतीर एव मम
तपुत्रं प्रति पित्रोरज्ञानपनाभिधानात्॥ तथागजवेतसगृहं एककस्यासौ
पुत्रश्चुत एकपुत्रं॥ एकग्रहणं पित्रोरनन्यगतिकत्वसूचनार्थं॥ तं मुनि
पुत्रं उपसंसन्निकृष्य अज्ञानतः करिभ्रांत्या स्वचरितं स्वकृत्यं ताभ्यां पित्
भ्यां॥ शशंस कथितवान्॥ ७७॥ तौ दंपती बहु विलप्य शिशोः प्रहर्त्रा शल्यं
निखातमुदहारयतामुरस्तः॥ सोऽभूत्परासुरथ भूमिपतिं शशाप हस्तार्पि

तैर्नयनवारिभिरेवावबद्धः॥७७॥जाविति॥तौ जायापती॥राजदंपतिभ्युश्च जाया
शब्दस्य दंभावः॥जंभावश्च विकल्पेन निपातितः॥दंपती जंपती जायापती भा
र्यापती चतौ इत्यमरः॥बहुविलापपरिदेवितैः रोरुदमानः वक्षसः निरवातं श
र्व्यं शरं प्रहर्ता राज्ञा उदहारयत् तां उद्धारयामास तु॥सा शिरः परासुर्मीलितः अ
भवत्॥अथ वृद्धो हंसो अपि तैर्नयनवारिभि रेव शापदानस्य जलपूर्वकत्वा
त्॥तैरेव भूमिपतिं शशाप॥७८॥दिष्टांतमाप्स्यति भवानपि पुत्रशोकादं
ते वयस्यहमिवेत्यजमुक्तवंतं॥आक्रांतपूर्वमिव मुक्तविषं भुजंगं प्रोवा
च कोसलपतिः प्रथमापराधः॥७९॥दिष्टेति॥हे राजन् भवानप्यंते वय
सि अहमिव पुत्रशोकाद्दिष्टांतं कालावसानं मरणमित्यर्थः॥दिष्टः काले

चंद्रैर्वेस्यादिरमितिविग्रहः॥ आस्यनीत्युक्तवंतं आक्रांपूर्वमित्याक्रांतः पूर्वः
सुस्तुपेनि समासः॥ तंप्रथममपकृतमित्यर्थः॥ उक्तं विषं अपकारिणं पश्चादु
रसि विषं भुजंगमिव स्थितं वृद्धं प्रथमापराधः प्रथमापराधी॥ इदं वसेहे
नेकारणमुक्तं॥ शापदानात्पश्चात् पराधी कोसलपतिर्दशरथः प्रोवाच॥
॥७९॥ शापोप्यदृष्टतनयाननपद्मशोभे सानुग्रहो भगवतामयिपातितो
यं॥ कृष्यां दहन्नपि खलु क्षितिमिंधनेद्धो बीजप्ररोहजननीं ज्वलनः करोति ८०॥
शापइति। अदृष्टतनयाननपद्मशोभावेन तस्मिन् अपुत्रकेमपि भगवतापा
तितः॥ वज्रप्रायत्वात्सानितमत इत्युक्तं॥ अयं पुत्रशोकात्प्रियस्वेसेवं
रूपः शापोपि सानुग्रहः॥ वृद्धः कुमार वंध्यायेनैषा वापि नांतरापकत्वात्सो

पकारएवनिग्राहकस्याप्यनुग्राहकत्वसमर्थान्तरन्यासेनाह॥ कृष्यामिति॥ इं
धनैः काष्ठैरिद्धः प्रज्वलितः ज्वलनः अग्निः कृष्याकर्षणार्हां क्षितिं दहन्न
पि बीजप्ररोहाणां बीजांकुराणां जननीमुत्पादनक्षमां करोति॥ ८०॥ इत्थं
गते गतघृणः किमयं विधत्तां वध्यस्तवेत्यभिहितो वसुधाधिपेन॥ एधान्हु
ताशनवतः समुनिर्ययाचे पुत्रं परासुमनुगंतुमनाः सदारः॥ ८१॥ इत्थंगतेव
नेसति वसुधाधिपेन राज्ञा गतघृणो निःकरुणोहं त्वद्वादनाएवं तव वध्यो
वधार्हः अयं जनः अपमितिराज्ञो विवेदनादरेणात्मनिर्देशः किंवि
धत्तामित्यभिहितेमया किं विधेयमिति विज्ञप्तः सः मुनिः सदारः सभार्यः प
रासुं गतासुं पुत्रमनुगंतुमनाः पश्यसः अनु गंतुंमनाः॥ अनुंकाममनसोर

पीत्रिम कारलोपः॥ हुताशनवतः साग्नीनेधान् काष्ठानि ययाचे॥ नचात्रालघा
नदोषः॥ अनुष्णा नासमर्थस्य वानप्रस्थस्य जीवनं॥ भृग्वग्निजलसंपातैर्मरणं
प्रविधीयत इति वचनात्॥८१॥ साप्तानुगः सपदि शासनमस्य राजा संपाद्य पा
नकं विलुलंघ्य निर्व्विवेद॥ अंजनि विपदमात्मविनाशहेतुं शापं दधज्ज्व
लनमौर्वमिवांबुराशिः॥८२॥ साप्तेति॥ सप्तानुगो राजा सपदि अस्य मुनेः शास
नं काष्ठसंभरणरूपं प्रागे कोपि सप्तानुगत्वात् संपाद्य पातकेन मुनिवधनि
मित्तेन विलुलंघ्य निर्विण्णो नाहः॥ अंजनि विपदं लब्धवान्॥ आत्मविना
शहेतुं शापं अंबुराशिरौर्वज्वलनं वडवानलमिव॥ और्वो वह्निर्वडवानल इत्य
मरः॥ दधत्सन् निर्विवेद॥८२॥ ॥श्रीमल्लक्ष्मीअनंतनारायणार्पणमस्तु॥

इति पदवाक्यप्रमाणपारावारपारीण श्रीमहोपाध्यायकोलाचलमल्लिनाथ
३३ सूरिविरचितायां रघुवंशव्याख्यायां संजीविनीसमाख्यायां दशरथक्रीडाव
र्णनं नाम नवमः सर्गः समाप्तिमगमत् ॥ लेखकपाठकयोः शुभं भवतु ॥ ॥
श्रीनृपशालिवाहनशके १७२५ रुधिरोद्गारी नामसंवत्सरे दक्षिणायने
वर्षर्तौ नौनभस्यासित त्रयोदश्यां भौमवासरे तद्दिने श्रीमद्राजटवि
ठ्ठसत्पुण्यक्षेत्रे भद्रप्रतिरथ्यायां गोदानिकटस्थगृहवासिना धर्मशा
स्त्रभूषितकुलेन श्रेष्ठपुत्रोपनाम्ना नारायणसुनुरंगनाथात्मजगोविं
देन नापीकरोपनाम्नो हरभविने लिखितं ॥ स्वार्थं परोपकारार्थं च लिखितं ॥ ३३